
# जागरूकतावचेतनासप्ताहमहोत्सव:

## VIGILANCE AWARENESS WEEK CELEBRATION



भारतसर्वकारनिदेशानुसारेण विद्यापीठप्राङ्गणे जागरूकतावचेतनासप्ताहमहोत्सव: 29.10.2018 दिनाङ्कात् 03.11.2018 दिनाङ्कं यावत् साडम्बरं पर्यपाल्यत । सन्दर्भेऽस्मिन् छात्रेषु भाषण-वादविवादस्पर्धा:, राष्ट्रियसङ्गोष्ठ्यादि नैके कार्यक्रमा: समचाल्यन्त । "Eradication of corruption and constructing new age India" इति वादविवादस्य विषय आसीत् । कार्यक्रमस्योद्घाटनसत्रे विद्यापीठस्य कुलसचिवा: आचार्या: जि.यस्.आर्.कृष्णमूर्त्तिमहोदया: समुपस्थाय "वसुधैव कुटुम्बकम्" इति सूक्तितत्त्वं विमृशन्त: सर्वै: समभावापन्नमनसा परस्परं मिलित्वा देशस्य हिताय कार्यं करणीयम्, कार्येषु सर्वेषां नैतिकता स्यादिति सभास्थलम् समुदबोधयन्त । सप्ताहव्यापिकार्यक्रमस्य संयोजका: **आचार्य राधाकान्तठाकुरमहोदया:** विद्यापीठस्य सर्वै: छात्रै:, कर्मचारै:, अध्यापकै:, अधिकारिभिश्च सह शपथपाठमकुर्वन् ।